# Shivanandamunivirachitam Saubhagyahridayastotram

# શિવાનન્દમુનિવિરચિતં સૌભાગ્યહૃદયસ્તોત્રમ્

## Document Information

Text title : Saubhagya Hridaya Stotram

File name : saubhAgyahRRidayastotram.itx

Category : devii, devI, shiva

Location : doc_devii

Author : Shivanandamuni

Transliterated by : Volunteers of Tripur□ Tallik□ provided by Brian Campbell tripura.tallika at gmail.com

Proofread by : Volunteers of Tripur□ Tallik□

Description/comments : □iv□nanda (1225-1275)

Acknowledge-Permission: Tripur□ Tallik□ is a small group of □r□vidy□ practitioners https://tripuratallika.org/

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

*sanskritdocuments.org*

# શિવાનન્દમુનિવિરચિતં સૌભાગ્યહૃદયસ્તોત્રમ્

તન્મહઃ પરમં નૌમિ કૃત્યૈઃ પઞ્ચભિરઙ્કિતમ્ ।
અશેષવિશ્વાભેદાત્મ પૂર્ણાહન્તાત્મકં શિવમ્ ॥ ૧॥

ત્રિધા વિભક્તં યદ્વસ્તુ સ્તોતૃસ્તુત્યસ્તુતિક્રમાત્ ।
એકસ્મૈ મહસે તસ્મૈ નમઃ સકલચક્ષુષે ॥ ૨॥

સ્મરામિ તાં પરાં વાચં પશ્યન્ત્યાદિક્રમાશ્રયામ્ ।
નાનાવિધરસાકારાં મહાનુભવરૂપિણીમ્ ॥ ૩॥

દેશકાલપદાર્થાત્મ યદ્યદ્વસ્તુ યથા યથા ।
તત્તદ્રૂપેણ યા ભાતિ તાં શ્રયે સાંવિદીં કલામ્ ॥ ૪॥

મૂલાદિબિલપર્યન્તં મહાત્રિપુરસુન્દરિ ।
યા તનુસ્તે તડિત્પ્રખ્યા તાં ભજે ભવશાતનીમ્ ॥ ૫॥

યોનૌ કનકપુઞ્જાભં હૃદિ વિદ્યુચ્છટોજ્જ્વલમ્ ।
આજ્ઞાયાં ચન્દ્રસઙ્કાશં મહસ્તવ મહેશ્વરિ ॥ ૬॥

પ્રસૃતામૃતરશ્મ્યૌઘસન્તર્પિતચરાચરામ્ ।
ભવાનિ ભવશાન્ત્યૈ ત્વાં ભાવયામ્યમૃતેશ્વરીમ્ ॥ ૭॥

વર્ણઃ કલા પદં તત્ત્વં મન્ત્રો ભુવનમેવ ચ ।
ઇત્યધ્વષટ્કં દેવેશિ ભાતિ ત્વયિ ચિદાત્મનિ ॥ ૮॥

અનાશ્રિતાદિકાલાગ્નિરુદ્રાન્તં ચિત્રમદ્ભુતમ્ ।
ઉન્મીલયસિ માતસ્ત્વં પ્રકાશવપુષિ ત્વયિ ॥ ૯॥

યદિદં ભાસતે દેવિ નામરૂપક્રિયાત્મકમ્ ।
પ્રકાશવપુષિ ત્વત્તસ્તત્સર્વં નાતિરિચ્યતે ॥ ૧૦॥

નેત્રાદિજાલકોપાન્તે હૃત્પદ્માસનલીલયા ।
વારં વારં ત્વયા દેવિ રૂપાદિમધુ સેવ્યતે ॥ ૧૧॥

સંવિદ્દેવ્યઃ સમાક્રમ્ય વિષયાનમૃતાસવાન્ ।
યોગિનાં પ્રેષયન્ત્યાર્યે ત્વત્પૂજાર્થં હિ સર્વદા ॥ ૧૨॥

સૌભાગ્યહૃદયં ગુહ્યં શિવાનન્દેન યોગિના ।
સમારાધનપૂર્ત્યર્થં સ્તુતં સકલકામદમ્ ॥ ૧૩॥

ઇતિ વિરચિતમેતત્ ત્રૈપુરં સ્તોત્રમાપ્તં
પ્રકટિતપરમાર્થં યોગિવર્યોપજુષ્ટમ્ ।
સકલદુરિતરોગધ્વંસનાનન્યકાર્યં
પ્રતિયજનવિધાનં સેવ્યતાં ભક્તિયુક્તૈઃ ॥ ૧૪॥

ઇતિ શિવાનન્દમુનિવિરચિતં સૌભાગ્યહૃદયસ્તોત્રં સમાપ્તમ્ ॥

Author: Śivānanda

Title: Saubhāgyahṛdayastotram

Source: Dwivedi, Vrajavallabha (ed). Nityāṣoḍaśikārṇavaḥ: Śivānandakṛtayā ṛjuvimarśinyā Vidyānandakṛtayā Artharatnāvalyā ca Saṃvalitaḥ. 2. Saṃskaraṇam. Vārāṇasyām: Sampūrṇānanda-Saṃskṛta-Viśvavidyālayaḥ. pp. 304-305. 1985.

Description: The Saubhāgyahṛdayastotra is one of the earliest devotional hymns to the goddess Tripurasundarī from the Śrīvidyā tradition. Composed by South India′s foundational Śrīvidyā commentator, Śivānanda (fl. c. 1225-1275), this rare hymn praises the goddess Tripurasundarī in fourteen verses that identify her with the highest principles of reality, as well as permeating the entirety of creation with radiant bliss. Filled with foundational Śaiva doctrine, esoteric kuṇḍalinī practices, deep contemplation, and praise, the Saubhāgyahṛdayastotra presents a complete picture of the majestic and alluring nature of the all-auspicious and sublime goddess, Tripurasundarī.

*Shivanandamunivirachitam Saubhagyahridayastotram*

pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*